# 34 - चतुस्त्रिंश दशकम्
## श्रीरामावतारम् - 1

गीर्वाणै रर्थ्यमानो दशमुख निधनं कोसलेष् वृश्यशृङ्गे
पुत्रीया मिष्टि मिष्ट्वा ददुषि दशरथ क्ष्माभृते पायसाग्र्यम् ।
तद् भुक्त्या तत् पुरन्ध्रीष्वपि तिसृषु समं जातगर्भासु जातो
रामस्त्वं लक्ष्मणेन स्वयमथ भरते नापि शत्रुघ्न नाम्ना ॥ ॥34-1॥

कोदण्डी कौशिकस्य क्रतुवर मवितुं लक्ष्मणे नानुयातो
यातोऽभूस् तात वाचा मुनि कथित मनु द्वन्द्व शान्ताध्व खेदः ।
नृणां त्राणाय बाणैर् मुनि वचन बलात् ताटकां पाटयित्वा
लब्ध्वास्मा दस्त्रजालं मुनिवन मगमो देव सिद्धाश्र माख्यम् ॥34-2॥

मारीचं द्रावयित्वा मख शिरसि शरै रन्य रक्षांसि निघ्नन्
कल्यां कुर्वन् अहल्यां पथि पद रजसा प्राप्य वैदेह गेहम् ।
भिन्दानश् चान्द्रचूडं धनु रवनि सुता मिन्दिरामेव लब्ध्वा
राज्यं प्रातिष्ठथास् त्वं त्रिभिरपि च समं भ्रातृवीरैस् सदारैः ॥34-3॥

आरुन्धाने रुषान्धे भृगुकुल तिलके संक्रमय्य स्वतेजः
याते यातोऽस् ययोध्यां सुखमिह निवसन् कान्तया कान्तमूर्ते ।
शत्रुघ्ने नैकदाथो गतवति भरते मातुल स्याधिवासं
तातारब्धोऽभिषेकः तव किल विहतः केकयाधीश पुत्र्या ॥ ॥34-4॥

तातोक्त्या यातुकामो वन मनुज वधू संयुतश् चाप धारः
पौरा नारुध्य मार्गे गुह निलय गतस् त्वं जटा चीर धारी।
नावा सन्तीर्य गङ्गाम् अधिपदवि पुनस्तं भरद्वाज मारात्
नत्वा तद्वाक्य हेतोः अति सुख मवसश् चित्रकूटे गिरीन्द्रे ॥ ॥34-5॥

श्रुत्वा पुत्रार्ति खिन्नं खलु भरत मुखात् स्वर्ग यातं स्वतातं
तप्तो दत्वाऽम्बु तस्मै निदधिथ भरते पादुकां मेदिनीं च
अत्रिं नत्वाऽथ गत्वा वनमति विपुलं दण्डकं चण्ड कायं
हत्वा दैत्यं विराधं सुगति मकलयश् चारु भोश् शारभङ्गीम् ॥॥34-6॥

नत्वाऽगस्त्यं समस्ताशर निकर सपत्रा कृतिं तापसेभ्य:
प्रत्यश्रौषी: प्रियैषी तदनु च मुनिना वैष्णवे दिव्य चापे ।
ब्रह्मास्त्रे चापि दत्ते पथि पितृ सुहृदं वीक्ष्य भूयो जटायुं
मोदात् गोदा तटान्ते परिरमसि पुरा पञ्चवट्यां वधूट्या ॥ ॥34-7॥

प्राप्तायाश् शूर्पणख्या मदन चल धृतेर् अर्थनैर् निस्सहात्मा
तां सौमित्रौ विसृज्य प्रबल तम रुषा तेन निर्लून नासाम् ।
दृष्ट्वैनां रुष्ट चित्तं खर मभि पतितं दूषणं च त्रिमूर्धं
व्याहिंसी राशरानपि अयुत समधिकां तत्क्षणा दक्षतोष्मा ॥ ॥34-8॥

सोदर्या प्रोक्त वार्ता विवश दशमुखादिष्ट मारीच माया
सारङ्गम् सारसाक्ष्या स्पृहित मनु गत: प्रावधीर् बाण घातम् ।
तन्मा याक्रन्द निर्यापित भव दनुजां रावणस् तामहार्षी:
तेनार्तोऽपि त्वमन्त: किमपि मुदमधास् तद्व धोपाय लाभात् ॥ ॥34-9॥

भूयस् तन्वीं विचिन्वन्अहृत दशमुखस् त्वत् वधूं मद्वधेनेति
उक्त्वा याते जटायौ दिव मथ सुहृद: प्रातनो: प्रेत कार्यम् ।
गृह्णानं तं कबन्धं जघनिथ शबरीं प्रेक्ष्य पम्पातटे त्वं
सम्प्राप्तो वात सूनुं भृश मुदित मना: पाहि वातालयेश॥ ॥34-10॥